


संस्कृतप्राकृतभाषाविभागः

## दीनदयाल-उपाध्याय-गोरखपुर-विश्वविद्यालयः, गोरखपुरम्

राष्ट्रियप्रत्यायनपरिषदा A++ श्रेण्या प्रत्यायितः

शिक्षा मंत्रालय
MINISTRY OF EDUCATION

विकसित भारत अभियान

# भारतीयभाषासमितिः, नवदेहली

अनयोः संयुक्त-तत्त्वावधाने आयोज्यमाना

सत्संकल्पः
संस्कृतभारतम्
समर्थभारतम्

# सरलमानकसंस्कृतम्

इत्याख्या एकदिवसीया कार्यशाला

18 मार्च 2024

## उद्घाटनसमारोहः

18 मार्च 2024 ।। प्रातः 10.00 वादने

**अध्यक्षः**



**प्रो. पूनम टंडन**
कुलपतिः
दीनदयाल-उपाध्याय-गोरखपुर-विश्वविद्यालयः
गोरखपुरम्

**मुख्यातिथिः**



**प्रो. श्रीप्रकाश पाण्डेयः**
आचार्यः, संस्कृतविभागः
बी.आर.ए.बिहारविश्वविद्यालयः
मुजफ्फरपुरम्

**सारस्वतातिथिः**



**प्रो. मुरलीमनोहरपाठकः**
कुलपतिः
श्री ला.ब.शा.रा.संस्कृतविश्वविद्यालयः
नवदेहली



**डॉ. कुलदीपकशुक्लः**
संयोजकः, सरलमानकसंस्कृतकार्यशाला
दीनदयाल-उपाध्याय-गोरखपुर-विश्वविद्यालयः
गोरखपुरम्



**डॉ. लक्ष्मीमिश्रा**
समन्वयकः, संस्कृतप्राकृतभाषाविभागः
दीनदयाल-उपाध्याय-गोरखपुर-विश्वविद्यालयः
गोरखपुरम्



**प्रो. कीर्तिपाण्डेया**
विभागाध्यक्षः, संस्कृतप्राकृतभाषाविभागः
दीनदयाल-उपाध्याय-गोरखपुर-विश्वविद्यालयः
गोरखपुरम्

## प्रास्ताविकम्

अस्माभिः व्यावहारिकं चिन्तनं करणीयम्। देशे पञ्चलक्षाधिकाः संस्कृतशिक्षकाः सन्ति, पञ्चकोट्यधिकाः संस्कृतच्छात्राः सन्ति, एतेषां सर्वेषां संस्कृतभाषणसामर्थ्यं कथं वर्धेत? उत्तराखण्डराज्ये हिमाचलप्रदेशराज्ये च यथा संस्कृतं द्वितीयराजभाषा उद्घोषिता आसीत् तथैव सर्वेषु राज्येषु संस्कृतभाषा द्वितीया राजभाषा स्यात् तदर्थम् आधिक्येन सरलसंस्कृतस्य व्यवहारः कार्यालयेषु, विद्यालयेषु, महाविद्यालयेषु, विश्वविद्यालयेषु च स्यात् तदर्थमेतादृशः प्रयासः सर्वैः संस्कृतज्ञैः करणीयः कारणीयश्च।

सरलमानकसंस्कृतम् - तदाधारेण सर्वेषां संस्कृतशिक्षकाणां भाषणाभ्यासः, नूतनपाठ्यपुस्तकानां रचना, छात्राणां भाषणाभ्यासः, संस्कृतशिक्षणे परिवर्तनम् इति एतद् अस्माकं सर्वेषां करणीयं कार्यम्। अग्रिमदशवर्षाणि यावत् सर्वैः अपि सम्भूय एतद् एकलक्ष्यकेन्द्रितं कार्यं करणीयम्। एषा वर्तमानसमयस्य आवश्यकता। संस्कृतानुरागिणां राष्ट्रनायकानाम् एषा एव अभियाचना यत् संस्कृतशिक्षकाणां सामयिकं कर्तव्यम्

भो मान्याः, आगच्छेयुः, संस्कृतं सरलमानकं स्यात् एतदर्थं स्वव्यवहारे सरलसंस्कृतं सुबोधगम्यम् अपि स्यात्। संस्कृतपाठनम् आकर्षकं कुर्युः,संस्कृतकक्ष्यासु सरलसंस्कृतभाषया एव अध्यापनं स्यात् इति संस्कृतशिक्षकाणां कार्यं, न तु सर्वकारस्य, तदपि सरलमानकसंस्कृतेन करणीयम् इति विषयम् अवगच्छेयुः।

अतः सर्वे अपि संस्कृतेन भाषणं कुर्युः, ये संस्कृतेन भाषन्ते ते सरलेन संस्कृतेन भाषणं कुर्युः, ये सरलेन संस्कृतेन भाषन्ते ते सरलतरेण संस्कृतेन भाषणं कुर्युः, ये सरलतरेण संस्कृतेन भाषन्ते ते सरलतमेन संस्कृतेन भाषणं कुर्युः।

## लक्ष्यसमूहाः

संस्कृतस्य शिक्षकाः, प्राध्यापकाः, विद्वांसः, लेखकाः, कवयः, अन्ये संस्कृतज्ञाः च।

## परिणामाः

सरलमानकसंस्कृतं सबलं भवेत्, सफलं भवेत्, सहजं भवेत्, सरसं भवेत्, सरस्वतीसमाराधनं भवेत्।

**प्रथमसत्रम् (११:०० - १२:००)**

किमर्थं सरलमानकसंस्कृतम् (चर्चारूपेण)

मुख्यवक्ता - प्रो. श्रीप्रकाश पाण्डेयः

**द्वितीयसत्रम् (१२:०० - ०१:००)**

सरलमानकसंस्कृतस्य स्वरूपम् (चर्चारूपेण)

मुख्यवक्ता - डॉ. अनिलकुमारः

**तृतीयसत्रम् (०२:०० - ०३:००)**

सरलमानकसंस्कृतेन प्रौढसंस्कृतस्य परिवर्तनम् (गणशः)

मुख्यवक्ता - डॉ. जोखन पाण्डेयः

**चतुर्थसत्रम् (०३:०० - ०४:००)**

सरलमानकसंस्कृतस्य क्रियान्वयनम् (चर्चारूपेण)

मुख्यवक्ता - श्री अतुलकुमारशुक्लः

# समापनसमारोहः

18 मार्च 2024 ।। सायम् 04.00 वादने

**अध्यक्षः**



**प्रो. कीर्तिपाण्डेया**
विभागाध्यक्षः, संस्कृतप्राकृतभाषाविभागः
दीनदयाल-उपाध्याय-गोरखपुर-विश्वविद्यालयः
गोरखपुरम्

**मुख्यातिथिः**



**प्रो. छायारानी**
पूर्वविभागाध्यक्षः, संस्कृतप्राकृतभाषाविभागः
दीनदयाल-उपाध्याय-गोरखपुर-विश्वविद्यालयः
गोरखपुरम्

**सम्मानितातिथिः**



**डॉ. मधुसत्यदेवः**
संस्कृतप्राकृतभाषाविभागः
दीनदयाल-उपाध्याय-गोरखपुर-विश्वविद्यालयः
गोरखपुरम्

## संचालनगणः

डॉ. देवेन्द्रपालः – सहायकाचार्यः

डॉ. स्मिताद्विवेदी – सहायकाचार्यः

डॉ. सूर्यकान्तत्रिपाठी – सहायकाचार्यः

डॉ. रंजनलता – सहायकाचार्यः

डॉ. धर्मेन्द्रकुमारसिंह – सहायकाचार्यः

डॉ. मृणालिनी – सहायकाचार्यः

डॉ. ज्ञानधरभारती – सहायकाचार्यः

डॉ. अर्चनाशुक्ला – सहायकाचार्यः

**सर्वेषां हार्दं स्वागतम्**